| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| परिहितनीलीवस्त्रस्य भोजनम्। | अज्ञानतस्त्रिरात्रोपवासः। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | ज्ञानात् द्वैगुण्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| स्वकीयोच्छिष्टभोजनम्। | कृच्छ्रपादः। एतत् सकृदज्ञानतः। | ० | ॥।० पणाः। | यथाशक्ति। |
| | अभ्यासे द्वैगुण्यादिकम्। त्यक्तभाजने भोजनेऽप्येवम्। | | | |
| ब्राह्मणकर्तृकब्राह्मणोच्छिष्टभोजनम्। | महाव्याहृतिभिरामन्त्र्य जलं पीत्वा उपवसेत्। | ० | ॥० पणाः। | यथाशक्ति। |
| | एतत् सकृदज्ञानतः। | | | |
| | ज्ञानात् द्वैगुण्यम्। | ० | १ कार्षापणः। | यथाशक्ति। |
| ब्राह्मणकर्तृकक्षत्रियोच्छिष्टभोजनम्। | सकृदज्ञाने त्र्यहं ब्राह्मीरसविपक्वक्षीरपानमात्रम्। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | ज्ञाने द्वैगुण्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| ब्राह्मणकर्तृकवैश्योच्छिष्टभोजनम्। | सकृदज्ञाने त्र्यहोपवासः ब्रह्मसुवर्चलापानञ्च। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | ज्ञानात् द्वैगुण्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| ब्राह्मणकर्तृकशूद्रोच्छिष्टभक्षणम्। | सकृदज्ञाने षड्रात्रोपवासः। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | ज्ञानात् द्वैगुण्यम्। | | | |
| | ज्ञानाभ्यासे चान्द्रायणम्। | ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| | क्षत्रियादीनां पादपादह्रानिः। | | | |
| | एतच्चात्पितृज्येष्ठभ्रातृणामुच्छिष्टव्यतिरिक्तविषयं तेषामुच्छिष्टस्य भोज्यत्वात्। | | | |
| बिड़ालकाकमूषिकनकुलश्वगवां उच्छिष्टभोजनम्। | त्र्यहोपवासः। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | एतत् सकृज्ज्ञानतः। | | | |
| | अज्ञाने ब्रह्मसुवर्चलां पीत्वोपवासः। | ० | ॥० पणाः। | यथाशक्ति। |
| | ब्रह्मसुवर्चला तु पीतकुसुमसूर्य्यावर्त्तः। | | | |
| | अत्यन्ताभ्यासे अतिकृच्छ्रम्। | ३ धेनवः। | ९ कार्षापणाः। | यथाशक्ति। |
| ब्राह्मणस्य कुत्सितपङ्क्तौ भोजनम्। पङ्क्तिः कुत्सितत्वञ्च निन्दितब्राह्मणाद्युपवेशनेन जलादिना पङ्क्तिभेदमन्तरेण च भवति। | अहोरात्रोपवासः स्नानं पञ्चगव्यपानञ्च। | ० | ॥० पणाः। | यथाशक्ति। |
| | एतत् ज्ञानतः। | | | |
| | क्षत्रियपङ्क्तौ भोजने नक्तव्रतम्। | ० | ।० पणाः। | यथाशक्ति। |
| | वैश्यपङ्क्तौ एकरात्रोपवासः। | ० | ॥० पणाः। | यथाशक्ति। |
| | शूद्रपङ्क्तौ त्रिरात्रोपवासः। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| पङ्क्तिषु एकस्योत्थाने भोजनम्। | द्व्यहसाध्यसान्तपनम्। | ० | १ कार्षापणः। | यथाशक्ति। |
| | एतद्ब्राह्मणस्य। | | | |
| | क्षत्रियादीनां पादपादह्रानिः। | | | |
| | एतज्ज्ञानतः सकृत्। अज्ञानतोऽर्द्धम्। | | | |
| सुराभाजनस्थजलपानम्। | पक्षं यावकपानम्। एतज्ज्ञानतः। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | अज्ञानतोऽर्द्धम्। | | | |
| मद्यभाण्डस्थजलपानम्। | सप्तरात्रं यावकपानम्। एतज्ज्ञानतः। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | अज्ञानतोऽर्द्धम्। | | | |
| | सुरासंसृष्टरेतोमूत्रादिदूषितजलादिपाने तु चतुरहसाध्यं तप्तकृच्छ्रम्। | सपादधेन्वसम्भवात् २ धेनू। | ३॥।०कार्षापणाः। | यथाशक्ति। |
| | एतदपि स्वाङ्गानुपलब्धावभ्यासे। | | | |
| चण्डालकूपभाण्डोदकपानम्। | ब्राह्मणस्य सान्तपनम्। | २ धेनू। | ६ कार्षापणाः। | यथाशक्ति। |
| | क्षत्रियस्य प्राजापत्यम्। | १ धेनुः। | ३ कार्षापणाः। | यथाशक्ति। |
| | वैश्यस्य प्राजापत्यार्द्धम्। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | शूद्रस्य प्राजापत्यपादः। | ० | ॥।० पणाः। | यथाशक्ति। |
| | एतत् सर्व्वं ज्ञानतः। | | | |
| | अज्ञानादेतस्यार्द्धम्। | | | |
| | आपत्काले तु पूर्व्वेद्युरुपोष्य पञ्चगव्यपानम्। | ० | ॥० पणाः। | यथाशक्ति। |